SUBJECT – DHANYALOKA

• ত্রয়ঃ ধ্বনিবিরোধিনঃ সিদ্ধান্তাঃ আলোচ্যতাম্।

উত্তরম্ :—

ধ্বন্যালোকঃ আনন্দবর্ধনস্য অলঙ্কারশাস্ত্রবিষয়কঃ সুপ্রসিদ্ধগ্রন্থঃ। ধ্বন্যালোকে চত্বারঃ উদ্যোতাঃ সন্তি। তত্র প্রথমে – ধ্বনিবিরোধিনাং মতং নিরাকৃত্য সমীক্ষাপূর্বকং ধ্বনিস্থাপনং কৃতম্। তেন ত্রয়ঃ সিদ্ধান্তাঃ উপস্থাপ্য খণ্ডিতাঃ —

ক) অভাববাদঃ।
খ) ভক্তিবাদঃ।
গ) অনির্বচনীয়তাবাদঃ।

অভাববাদঃ :—

ধ্বনিকারঃ সর্বাদৌ অভাববাদং উপস্থাপ্য খণ্ডিতবান্। অভাববাদিনাং ত্রয়ঃ বিকল্পাঃ সম্ভবন্তি।

① প্রথম অভাববাদী :—

প্রথম অভাববাদিনাং মতং এবং —

।শব্দার্থশরীরং তাবৎ কাব্যম্। তত্র চ শব্দগতাশ্চারুত্বহেতবোঽনুপ্রাসাদয়ঃ প্রসিদ্ধা এব। অর্থগতাশ্চোপমাদয়ঃ। বর্ণসংঘটনাধর্মাশ্চ যে মাধুর্যাদয়স্তেঽপি প্রতীয়ন্তে। তদনতিরিক্তবৃত্তয়ো বৃত্তয়োঽপি যাঃ কৈশ্চিদুপনাগরিকাদ্যাঃ প্রকাশিতাঃ তা অপি গতাঃ শ্রবণগোচরম্। রীতয়শ্চ – বৈদর্ভীপ্রভৃতয়ঃ। তদ্ব্যতিরিক্তঃ কোঽয়ং ধ্বনির্নামেতি॥

①

তত্র প্রথমমতং ধ্বনির্বা ধ্বনিবিরোধিনাং প্রোক্তং — যদ্ যত্র প্রতীয়মানঃ অর্থঃ প্রতিপাদ্যতে স ধ্বনিঃ। যথা অঙ্গনাসু লাবণ্যং তথৈব কাব্যবাক্যেষ্বপি প্রতীয়মানোঽর্থঃ ভিন্নঃ। স এব কাব্যে (কাব্যলক্ষণত্বেনোক্তঃ।"

② <u>দ্বিতীয় অভাববাদী</u> :→

দ্বিতীয় বিকল্পানুসারেণ— "ভাক্ত এব ধ্বনিঃ" যঃ প্রসিদ্ধপ্রস্থানভিন্ন ধ্বনিনামকঃ কশ্চিৎ কাব্যপ্রকারো স্বীক্রিয়তে স তু কাব্যত্বব্যাঘাতক এব। সহৃদয়হৃদয়াহ্লাদকারী- শব্দার্থৌ কাব্যম্, শব্দার্থশোভাকারিণঃ গুণালঙ্কারাশ্চ বর্ণিতাঃ। তদ্ভিন্নঃ ধ্বনিসংজ্ঞকঃ কাব্যপ্রকারঃ সর্বথৈব অনুপলব্ধিত্বাং নৈব প্রভবতি"

অভাববাদিনাং দ্বিতীয়মতং ধ্বনির্বা ধ্বনিনাং প্রোক্তং — যদপি উক্তং প্রসিদ্ধপ্রস্থানাতিরিক্তমার্গস্য কাব্যত্বহানেঃ ধ্বনির্নাস্তি ইত্যপি অযুক্তং, যতো লক্ষণকৃতামেব স কেবলং ন প্রসিদ্ধঃ লক্ষ্যে তু পরীক্ষ্যমাণে স এব সহৃদয়হৃদয়াহ্লাদকারি কাব্যতত্ত্বম্।

③ <u>তৃতীয় অভাববাদী</u> :→

তৃতীয় অভাববাদিনাং মতম্ "ন সম্ভবত্যেব ধ্বনির্নাম অপূর্বঃ কশ্চিৎ; কমনীয়কম্ অনতিবর্তমানস্য তস্যোক্তেষ্বেব চারুত্বহেতুষু;"

②

অর্থাৎ — কাব্যশোভাকরেভ্যঃ গুণালঙ্কারাদিভ্যঃ ব্যতিরিক্তস্য ধ্বনিরূপস্য সৌন্দর্যবিশেষস্য তত্ত্বং নাস্তি।

অভাববাদিনাং তৃতীয়মতং খণ্ডয়িত্বা ধ্বনিবাদিনাং প্রোক্তম্ — ধ্বনেঃ ন গুণালঙ্কারাদিষু অন্তর্ভাবঃ, অলঙ্কারাদয়স্তু বাচ্যবাচকসৌন্দর্যবিধায়কাঃ। কিন্তু ব্যঙ্গ্য-ব্যঞ্জকসমাশ্রয়স্য ধ্বনেরন্তর্ভাবো নৈব তেষু সম্ভবঃ। ইতি তু অন্যালঙ্কারেভ্যঃ এব। অতোঽয়ং পক্ষ— ধ্বনেস্তু সত্যম্। প্রথম আলীন: অপে: অন্তর্ভাব:।

(খ) ভাক্তবাদী:—

অতঃ পরং ধ্বনিবিরোধিনাং ভাক্তবাদিনাং মতম্-উপস্থাপ্য খণ্ডিতবান্। তন্মতে ধ্বনিরেব — "ভক্তি-রূপ" এব। অত্র ভক্তিশব্দেন লক্ষণা বা গৃহ্যতে, মুখ্যার্থ-বাধঃ ভঞ্জনম্; প্রয়োজনানাং ত্রয়- লক্ষণায়াঃ বীজত্রয়ম্। বাধঃ, হেতুঃ, প্রয়োজনম্(?) — ভক্তি পদস্য এভির্বা বিগ্রহঃ। তথা— আভিধেয়ার্থেন 'ভক্তি' পদস্য ...

(a) "ভজ্যতে সেব্যতে পদার্থেন প্রসিদ্ধতয়া উৎপ্রেক্ষ্যতে — ইতি ভক্তিঃ",

(b) "ভক্তিঃ প্রতিপাদ্যে সামীপ্যতৈক্ষ্ণ্যাদৌ শ্রদ্ধাতিশয়ঃ";

(c) মুখ্যার্থস্য ভঙ্গঃ ভক্তিঃ।

অন্যথা — ভক্তিলক্ষণাবাদিঃ ধ্বনিশব্দোল্লেখেন লক্ষণা অথবা গৌণী- প্রকারেণ প্রতিপাদিতঃ তথাপি

③

লক্ষণয়া দ্যোত্যেষু ব্যবহারং দর্শয়তা ধ্বনিমার্গো মনাক স্পৃষ্টোঽপি ন লক্ষিতঃ। অতএব কেচন ধ্বনিং ভক্তিং মন্যন্তে। পূর্বঃ ভাক্তবাদিনাং ত্রয়ঃ বিকল্পাঃ সন্তি,

প্রথমবিকল্পানুসারং — ভক্তিরেব ধ্বনিঃ।

দ্বিতীয়বিকল্পানুসারং — ভক্তিঃ ধ্বনেঃ লক্ষণম্,

তৃতীয়বিকল্পানুসারং :— যথা লক্ষ্যে দোষত্রয়প্রদর্শিতস্য লক্ষণস্য কেবলং অংশস্য সূচকমাত্রত্বম্ উপলক্ষণত্বং তথৈব ~~ধ্বনি~~ ভক্তিঃ ধ্বনেঃ উপলক্ষণম্।

প্রথমবিকল্পখণ্ডনম্ —

প্রথমবিকল্পং খণ্ডয়িত্বা ধ্বনিকারেণ প্রোক্তং — "ভক্ত্যা বিভর্তি নৈকত্বং রূপভেদাদয়ং ধ্বনিঃ"। ভিন্নরূপত্বাৎ ধ্বনিঃ ভক্ত্যা একত্বং ন ভজতে।

দ্বিতীয়বিকল্পখণ্ডনম্ :—

দ্বিতীয়বিকল্পং খণ্ডয়িত্বা ধ্বনিকারেণ প্রোক্তং — "অতিব্যাপ্তেরথাব্যাপ্তের্ন চাসৌ লক্ষ্যতে তয়া"। অর্থাৎ যদি ধ্বনেঃ ভক্তিঃ ভক্তিঃ লক্ষণং ভবতি তর্হি তত্র অতিব্যাপ্তিদোষঃ অব্যাপ্তিদোষঃ ভবতি।

তৃতীয়বিকল্পং খণ্ডনম্ :—

তৃতীয়বিকল্পং খণ্ডয়িত্বা ধ্বনিকারেণ প্রোক্তং — "কস্যচিদ্ ধ্বনিভেদস্য সা তু স্যাদুপলক্ষণম্"।

অন্বয়িত্বে সতি- ইতরবোধিত্বম্- উপলক্ষণম্। উক্তঃ তত্ত্বসম্বন্ধস্য ধ্বনিভেদস্য অবিবক্ষিতবাচ্য- উপলক্ষণত্বং ভবেৎ, ন তু ধ্বনিমাত্রস্য।

অনির্বচনীয়তাবাদী :-

অনির্বচনীয়বাদিনাং মতম্ এবং —

" লক্ষণকরণশালীনবুদ্ধয়ো ধ্বনেস্তত্ত্বং গিরামগোচরং- সহৃদয়হৃদয়সংবেদ্যমেব সমাখ্যাতবন্তঃ "।

এষাং মতম্ ধ্বনিস্বরূপ ধ্বনিকারেণ খণ্ডিতম্ — ধ্বনেঃ সহৃদয়হৃদয়সংবেদ্যমেব বস্তু- অনির্বচনীয়ম্ — এতন্মতং ন যুক্তিযুক্তম্। ~~ধ্বনেঃ~~ যতঃ ধ্বনেঃ সামান্যলক্ষণং বিশেষলক্ষণং চ প্রতিপাদিতম্ অতঃ ধ্বনিতত্ত্বং ন অনির্বচনীয়ম্।

অনেন প্রকারেণ ধ্বন্যালোকে ধ্বনি- বিরোধিনাং মতং ধ্বনিকারঃ স্বমতং উপস্থাপিতবান্।